# 2022

## SANSKRIT — GENERAL

**Paper : GE/CC-2**

**(Sanskrit Prose)**

MURALIDHAR GIRLS' COLLEGE LIBRARY

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**Unit - I & II**

**(Marks : 30)**

1. अधोलिखितेषु ***दशानां*** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरलिप्या च लेख्यम्। 2×10

(a) "शुकनासोपदेशः" कस्मिन् मूलग्रन्थे अन्तर्भवति? तस्य मूलग्रन्थस्य रचयिता कः?

(b) तारापीडः कः आसीत्? तस्य पुत्रस्य नाम किम्?

(c) के धनपिशितग्रासगृध्राः? कथं ते एवमुच्यन्ते?

(d) "अपरिणामोपशमो दारुणो लक्ष्मीमदः"– केन प्रसङ्गेन कः एवमुक्तवान्?

(e) यौवनकाले यूनां दृष्टिः कथमनुरागपूर्णा भवति?

(f) लक्ष्मीः कथम् अमृतसहोदरेति कथ्यते?

(g) अमलमपि गुरुवचनं केषां श्रवणस्थितं शूलमुपजनयति?

(h) "अयमेव च अनास्वादितस्य विषयरसस्य ते काल उपदेशस्य"– केनोक्तम्? 'ते' इति पदेन कः बोधितः?

(i) लक्ष्मीः कस्मात् उद्गता? उद्गमकाले सा विरहविनोदचिह्नरूपेण उच्चैःश्रवसः किं गृहीतवती?

(j) "इयमनार्या लब्धापि खलु दुःखेन परिपाल्यते"– अनार्येति पदेन का बोधिता? कथं सा दुःखेन परिपाल्यते?

(k) कीदृशे मनसि कथं च उपदेशगुणाः विशन्ति?

(l) कदा बुद्धिः कालुष्यमुपयाति?

(m) किमर्थं लक्ष्मीः नारायणमूर्तिमाश्रितवती?

2. अधोलिखितयोः ***कस्यचनैकस्य*** उत्तरं लेखनीयम्। 10×1

(a) स्वार्थनिष्पादनपरैः धूर्तैः राजानः कथं प्रतारिता भवन्तीति "शुकनासोपदेश" इति पाठ्यांशानुसारेण विव्रियताम्।

(b) "बाणोच्छिष्टं जगत् सर्वम्"– इत्युक्तेः यथार्थता विचार्यताम्।

MURALIDHAR GIRLS' COLLEGE LIBRARY

## Section - B

### Unit - II

**(Marks : 20)**

3. यथेच्छं ***पञ्चानां*** प्रश्नानामुत्तरं देयम्। तेषु न्यूनतया द्वयोः उत्तरं संस्कृतभाषया देवनागरलिप्या च लेखनीयम्। 2×5

(a) "भज्यमानं च स्वरमवागच्छत्"– अत्र अधोरेखाङ्किंतपदस्य व्युत्पत्तिः निर्णेया।

(b) महामदः कस्य देशस्य निवासी आसीत्? कस्मिन् विक्रमाब्दे स प्राणान् अत्यजत्?

(c) कः शहाबुद्दीनः? कस्मिन् विक्रमाब्दे स दिल्लीमवरुद्धवान्?

(d) "स एव प्राधान्येन भारते यवनराज्याङ्कुरारोपकः अभूत्" – अत्र अधोरेखाङ्कितपदस्य विग्रहवाक्यं प्रदाय समासनाम लिख्यताम्।

(e) "विजयपुराधीश्वरेण साम्प्रतमस्य प्रबृद्धं वैरम्"– अत्र अधोरेखाङ्कितपदस्य विग्रहवाक्यं प्रदाय समासनाम लिख्यताम्।

(f) "मन्दिराणि मन्दुरीक्रियन्ते"– अत्र अधोरेखाङ्कितपदस्य व्याकरणानुसारिणी टिप्पणी कार्या।

(g) महामदः कतिवारं भारतवर्षमलुण्ठत?

(h) "उपक्रमममुमाकर्ण्य अवलोक्य च"– अत्राधोरेखाङ्कितपदस्य व्युत्पत्तिः निर्णेया।

4. अधोलिखितयोः कस्य***चिदेकस्य*** संस्कृतभाषया देवनागरलिप्या च व्याख्या कार्या। 5×1

(a) विलक्षणोऽयं भगवान् सकल-कला-कलाप-कलनः सकल-कालनः करालः कालः।

(b) अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते। परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्।

5. अधोलिखितयोः ***एकस्य*** मातृभाषयानुवादः करणीयः। 5×1

(a) सम्प्रति तु म्लेच्छैर्गावो हन्यन्ते, वेदाः विदीर्यन्ते, स्मृतयः समृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि? शन्तिमाकलय्यातिसंक्षेपेण कथय यवनराज्यवृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम्।

(b) स च प्रजा विलुण्ठ्य, मन्दिराणि निपात्य, प्रतिमा विभिद्य, परश्शतान् जनांश्च दासीकृत्य, शतश उष्ट्रेषु रत्नान्यारोप्य, स्वदेशमनैषीत्। एवं स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरदेशचूडायितं सोमनाथतीर्थमपि धूलीचकार।

## Section - C

## Unit - II

**(Marks : 15)**

**6.** यथेच्छं विषय***द्वय***मादाय टीका लेखनीया। 5×2

(a) पञ्चतन्त्रम्।

(b) हितोपदेशः।

(c) वेतालपञ्चविंशतिका।

**7.** अधोदत्तयोः यथाभिमतं ***विषयमेक***माश्रित्य टीका लेखनीया। 5×1

(a) पुरुषपरीक्षा।

(b) सिंहासनद्वात्रिंशिका।

---

MURALIDHAR GIRLS' COLLEGE
LIBRARY